# माध्यमिकशिक्षापाठ्यक्रमः

## सामवेदः

**कक्षा : ९–१०** **विषयसङ्केतः :** (**कक्षा ९** Sam. 303 **कक्षा १०** Sam. 304)

**पाठ्यघण्टा : ५** **वार्षिककार्यघण्टा : १६०**

## १. परिचयः

वैदिकवाङ्मयं संसारस्य ज्ञानस्रोतो विद्यते । संहिता-ब्राह्मणारण्यकोपनिषद्रूपोऽपौरुषेयो वेदः सनातनधर्मस्य, सनातनसंस्कृतेश्च मूलमस्ति । तदत्र वेद-वेदाङ्ग-उपाङ्गसाहित्यादिकञ्च महद् वाङ्मयं विद्योतते । वेदेषु गीतिप्रधानः सामवेदः । सामवेदविषयकोऽयं पाठ्यक्रमो नवम्यां दशम्याञ्च कक्षायामध्येतुकामानां छात्राणां संहितागतमन्त्राणाम्, ग्रामेगेयारण्येगेय-ऊहपठितगानमन्त्राणां सामगानाधारर्ङ्मन्त्राणाम्, पदपाठादयोः बोधो भवत्विति धिया निर्मितो वर्तते । पाठ्यक्रमोऽसौ २०७६ तमे वैक्रमाब्दे प्रकल्पितराष्ट्रियपाठ्यक्रमप्रारूपस्य मार्गदर्शनानुसारेण निर्मितो वर्तते । अस्मिँश्च पाठ्यक्रमे प्रतिप्रकरणं निर्धारितविषयाणां ज्ञानं, ज्ञातविषयाणाञ्चाभिव्यक्तिसामर्थ्यञ्च छात्रेषु स्यादिति धिया बोधाभिव्यक्त्योरुल्लेखो विहितो वर्तते । अतः अस्मात् पाठ्यक्रमादपि राष्ट्रियोद्देश्यं प्राप्यत इत्यपेक्षितं वर्तते । पाठ्यक्रमेणानेन च सम्बद्धविषये उच्चशिक्षाया आधारोऽपि दृढीक्रियत इत्यप्यपेक्षितमस्ति ।

सामवेदः सहस्रशाखात्मकः परन्तु कालवशाल्लोपं प्राप्ताः सन्तः सम्प्रति कौथुम-राणायनीय-जैमिनिशाखाः पठनपाठनसरण्यां विलोक्यन्ते । सामवेदे संहितागतमन्त्राः, ग्रामेगेयारण्येगेय-ऊहपठितगानमन्त्राः सामगानाधारर्ङ्मन्त्राः, पदपाठादयो विपुलसाहित्यमस्ति । तेन कारणेन सामसाहित्याध्ययनं विद्यालयशिक्षायां नवमीकक्षातः प्रारभ्यते । पाठ्यक्रमोऽयं सामवेदस्य कौथुमशाखासम्बद्धः । तदनुरूपमस्मिन् पाठ्यक्रमेऽ ग्न्यादिदेवतासम्बद्धमन्त्र-अग्निपूषाविश्वेदेवब्रह्मणस्पतिसम्बद्धमन्त्र-अग्निदेवमन्त्र- गायत्र्यादिसामगानमन्त्र-अग्निस्तुतिपरकगानमन्त्र-रुद्रादिगान-स्वरादीनां गानोदाहरण-सामशिक्षा-गान्धर्ववेद-वेदाध्ययनविधिसम्बद्धा विषयाः पाठ्यविषयत्वेन निर्धारिताः सन्ति । तथैव गानाधारर्ग्-इन्द्रदेवमन्त्र-आार्चिकस्वरोदाहरणान्वेषण-विश्वेदेवादिगान-रुद्र-इन्द्रस्तुतिगान-स्वरविशिष्टसामगान-स्वरश्रुत्यादीनां गानोदाहरण-स्वरितादिस्वरभेद-नारदीयशिक्षा-स्वरमात्रासम्बद्धा विषयाश्च पाठ्यविषयत्वेन निर्धारिताः सन्ति । अतोऽस्य पाठ्यक्रमस्याध्ययनेन छात्रा स्वशाखासम्बद्धायाः सामवेदमन्त्रसंहितायाः पारम्परिकाध्ययने, स्वरवर्णोच्चारणस्य नियमपरिज्ञानपुरःसरं सामवेदमन्त्रसंहिताया अध्ययने समर्था भविष्यन्तीति भिन्नभिन्नशीर्षकेषु पृथक्-पृथग् विवरणं समुल्लिखितं वर्तते ।

पाठ्यक्रमोऽसौ विषयपरिचयः, स्तरगतयोग्यताः, कक्षागतशिक्षणोपलब्धयः, समग्रपाठ्यवस्तुविवरणम्, शिक्षणसहजीकरणप्रक्रिया, विद्यार्थिमूल्याङ्कनञ्चेत्यादिपक्षान् समाविश्य विकासं नीतोऽस्ति । पाठ्यक्रमेऽस्मिन् प्रयोगसिद्धामाधुनिकशिक्षणपद्धतिमवलम्ब्य पाठ्यविषयाणां विस्तारः कृतो विद्यते । अत्र सन्निविष्टा विषया विद्यार्थिनां शिल्पाभिवृ|यभिव्यक्तिकलानां विकासाय प्रयोगप्रधानं व्यावहारिकञ्च शिक्षणविधिं भृशमुपकुर्युरिति पाठ्यक्रमेणानेन आत्मसात्कृतो विषयः । शिक्षणसहजीकरण-सम्बद्धाः प्रदर्शनात्मकप्रश्नोत्तरप्रक्रिया, स्वाध्यायपरामर्शपद्धतिः, औत्सुक्यवर्धकक्रियाकलापाः, निर्माणात्मक-निर्णयात्मकमूल्याङ्कनप्रक्रिया, सैद्धान्तिकेन आन्तरेण च मूल्याङ्कनेन सिद्धा वैज्ञानिकी परीक्षणपद्धतिश्च शिक्षणपद्धतिदृष्ट्या पाठ्यक्रमम् अमुम् उपकुर्युरिति च पाठ्यक्रमेणानेन समुद्दिष्टो विषयः । पाठ्यक्रमेऽस्मिन् पाठ्यविषयसंयोजनविधौ, स्तरगतक्षमता-कक्षागतशिक्षणोपलब्धिविस्तारविधौ, शिक्षणविधि-मूल्याङ्कनप्रविधिप्रस्तुतौ च पूर्वकक्षाभिस्सहोत्तरोत्तरं सोपानक्रमिकं सन्तुलनं स्यादिति विषये विशेषावधानं दत्तमस्ति ।

केवलसैद्धान्तिकज्ञानापेक्षया विद्यार्थिनामाचार-व्यवहार-विचारादिसम्बलितं चतुरस्रं व्यक्तित्वं वर्धेत इति पाठ्यक्रमस्यास्य प्रधानं लक्ष्यमस्ति ।

## २. विषयानुगताः क्षमताः

माध्यमिकस्तरस्यनवमदशमकक्षयोः सामवेदविषयमधीत्य विद्यार्थिनो निर्दिष्टविषयेषुक्षमा भविष्यन्ति-

१. सामवेदकौथमशाखायाः गानाधारभूतायाः संहितायाः वेदाध्ययनपरम्परानुरूपं गुरुमुखोच्चारणपूर्वकंस्वरोच्चारणाववबोधे

२. सामवेदकौथुमशाखायाः द्रविणपद्धतेरनुरूपं स्वरादिभिः परिगणितपरिभाषणादिभिः गानोच्चारणे

३. हस्तोपरि स्वरन्यासपूर्वकं साममन्त्राणां शुद्धोच्चारणे लेखने च

४. सामवेदाध्ययनप्रकारस्य स्वरमात्रानिर्धारणपूर्वकम् अभिव्यक्तौ लेखने च

५. सामवेदीयकौथुमसंहिताया ऋषिच्छन्दोदेवतादीनामवबोधे

६. सामगानाध्ययनपरम्पराया वैशिष्ट्यप्रकाशने

७. निर्धारितमन्त्राणाम् आर्चिकगानस्वश्रुत्युदाहरणाववबोधे प्रकाशने च

८. सामगान-शास्त्रीयसङ्गीतस्वराद्यवगमे

९. यज्ञयागादिषु प्रयुक्तानां मन्त्राणां सन्दर्भानुकूलं प्रयोगे

१०. गान्धर्ववेदसम्बद्धमहो‌वावबोधे प्रकटने च

## ३. कक्षागतशिक्षणोपलब्धयः

कक्षा ९

**माध्यमिकस्तरीयायां ९ कक्षायां सामवेदविषयमधीत्य छात्रा अधो निर्दिष्टविषयेषु क्षमा भविष्यन्ति -**

| क्र.सं. | शिक्षणोपलब्धयः | शिक्षणोपलब्धीनां विस्तरः |
|---|---|---|
| १ | अग्न्यादिदेवतासम्बद्धमन्त्राणा-मुच्चारणं लेखनञ्च | १.१ सम्बद्धदेवतागतमन्त्राणां सस्वरं श्रवणम्, श्रवणानुरूपमुच्चारणञ्च<br>१.२ निर्दिष्टमन्त्राणां हस्तस्वरन्यासपूर्वकं पठनम्<br>१.३ निर्दिष्टमन्त्राणां सस्वरं सशुद्धि लेखनम्<br>१.४ गानाधारमन्त्राणां सस्वरं प्रयोगसामर्थ्योत्पादनम्<br>१.५ उदात्तानुदात्तस्वरितकम्प-उत्स्वरित-प्रचय-शिकोदात्तसहितमुच्चारणम् |
| २. | अग्निपूषाविश्वेदेवब्रह्मणस्पति-सम्बद्धमन्त्राणामुच्चारणं लेखनञ्च | २.१ सम्बद्धदेवतागतमन्त्राणां सस्वरं श्रवणम्, श्रवणानुरूपमुच्चारणञ्च<br>२.२ निर्दिष्टमन्त्राणां हस्तस्वरन्यासपूर्वकं पठनम् |

| | | |
|---|---|---|
| | | २.३ निर्दिष्टमन्त्राणां सस्वरं सशुद्धि लेखनम्<br>२.४ गानाधारमन्त्राणां सस्वरं प्रयोगसामर्थ्यमुत्पादनम्<br>२.५ उदात्तानुदात्तस्वरितकम्प-उत्स्वरित-प्रचय-शिकोदात्तसहितमुच्चारणम् |
| ३. | अग्निदेवमन्त्रान् पठित्वा आर्चिकस्वरोदाहरणान्वेषणम् | ३.१ आर्चिकस्वरमन्त्रनिर्धारणपूर्वकं तत्परिगणितुम्<br>३.२ आर्चिकस्वरोदाहरणमन्त्रेषु आर्चिकस्वरान् प्रस्तोतुम्<br>३.३ आर्चिकस्वराणामुदाहरणानि निर्धारयितुम्<br>३.४ आर्चिकपाठगताध्यायदशतिखण्डसम्बद्धमन्त्रसंख्यासंकेतनम् |
| ४ | गायत्र्यादिसामगानमन्त्राणा-मुच्चारणम् | ४.१ गायत्रगानादिसामनामानि तन्मन्त्रप्रतीकानि निर्दिश्य पठनं लेखनञ्च<br>४.२ क्रुष्ट-प्रथम-द्वितीय-तृतीय-चतुर्थ-मन्द्रातिस्वार्याणां सप्तस्वराणां निर्धारणपूर्वकं सामगानोच्चारणम्<br>४.३ नमन-अभिगीत-विनत-प्रेङ्खाप्रभृति-अवान्तरस्वरनिर्धारणेन साकं गानपठनम्<br>४.४ ससम्प्रदायं गुरुमुखोच्चारणपूर्वकं गानपठनम् |
| ५. | अग्निस्तुतिपरकगानमन्त्राणां ज्ञानम् | ५.१ आग्नेयपर्वसम्बद्धसामनामानि तन्मन्त्रप्रतीकानि निर्दिश्य पठनं लेखनञ्च<br>५.२ क्रुष्ट-प्रथम-द्वितीय-तृतीय-चतुर्थ-मन्द्रातिस्वार्याणां सप्तस्वराणां निर्धारणपूर्वकं सामगानोच्चारणम्<br>५.३ नमन-अभिगीत-विनत-प्रेङ्खाप्रभृति-अवान्तरस्वरनिर्धारणेन साकं गानपठनम्<br>५.४ ससम्प्रदायं गुरुमुखोच्चारणपूर्वकं गानपठनम्<br>५.५ दीप्तायतामृदुमध्यमाकरुणश्रुतीनां परिगणनपूर्वकमेकस्वरेण पठनम् |
| ६. | रुद्रादिगानज्ञानम् | ६.१ रुद्रादिस्तुतिसम्बद्धसामनामानि तन्मन्त्रप्रतीकानि निर्दिश्य पठनं लेखनञ्च<br>६.२ क्रुष्ट-प्रथम-द्वितीय-तृतीय-चतुर्थ-मन्द्रातिस्वार्याणां सप्तस्वराणां निर्धारणपूर्वकं सामगानोच्चारणम्<br>६.३ नमन-अभिगीत-विनत-प्रेङ्खाप्रभृति-अवान्तरस्वरनिर्धारणेन साकं गानपठनम्<br>६.४ ससम्प्रदायं गुरुमुखोच्चारणपूर्वकं गानपठनम्<br>६.५ दीप्तायतामृदुमध्यमाकरुणश्रुतीनां परिगणनपूर्वकमेकस्वरेण पठनम् |
| ७. | स्वराणां गानोदाहरणान्वेषणम् | ७.१ पठितेषुगानेषुसप्तस्वर-अवान्तरस्वरान् निर्धार्य प्रदर्शनम् |

| | | |
|---|---|---|
| | | ७.२ निर्दिष्टगानेषुपञ्चश्रुतीनामुदाहरणोच्चारणं लेखनञ्च<br>७.३ गानेषुतान-मूर्च्छना-रागाणामुदाहरणान्वेषणम् |
| ८. | सामशिक्षाध्ययनम् | ८.१ संहिताध्ययनोद्देश्यप्रदर्शनम्<br>८.२ मूलस्वरनिर्धारणपूर्वकं स्वरद्वैविध्य-त्रैविध्यनिरूपणम्<br>८.३ पारम्परिकस्वरोच्चारणरीतिमवलम्ब्य पशुपक्षिध्वनितोलनपूर्वकं याथातथ्यस्वरोच्चारणं शुद्धस्वरोच्चारणस्य फलावबोधश्च<br>८.४ शास्त्रीयसङ्गीतस्वरमूलम् सामस्वरकथनम्<br>८.५ दीप्तायतामृदुमध्यमाकरुणश्रुतीनां परिचयप्रापणम् |
| ९. | गान्धर्ववेदाध्ययनम् | ९.१ गान्धर्वशब्दपरिचयेन साकं गान्धर्वस्योपवेदत्वपरिचयकथनम्<br>९.२ सामस्वरप्रभावितातान् शास्त्रीयसङ्गीतस्वरान् प्रस्तोतुम्<br>९.३ नारदीयशिक्षा-सङ्गीतरत्नाकरगतविषयप्रस्तुतिशैलीविमर्शनम् |
| १० | वेदाध्ययनविधिज्ञानम् | १०.१ ससम्प्रदायम् आचार्यकृतां वेदाध्ययनपरम्परां विमृश्य अध्ययनविधेर्व्याख्यानम्<br>१०.२ गोकर्णवद्धस्तस्थापनम्, हस्तयोरङ्गुलिन्यासः, उच्चारणस्य विधिप्रबोधनम्<br>१०.३ नारदीयशिक्षाया विषयप्रस्तुतिशैलीविमर्शनम् |

कक्षा १०

**माध्यमिकस्तरीयायां १० कक्षायां सामवेदविषयमधीत्य छात्रा अधो निर्दिष्टविषयेषु क्षमा भविष्यन्ति -**

| क.सं. | शिक्षणोपलब्धयः | शिक्षणोपलब्धीनां विस्तरः |
|---|---|---|
| १. | गानाधारर्ग्ज्ञानम् | १.१ ऋग्गानयोः सम्बन्धप्रकटनम्<br>१.२ निर्दिष्टमन्त्राणां हस्तस्वरन्यासपूर्वकं पठनम्<br>१.३ निर्दिष्टमन्त्राणां सस्वरं सशुद्धि लेखनम्<br>१.४ गानाधारमन्त्राणां सस्वरं प्रयोगसामर्थ्योत्पादनम्<br>१.५ उदात्तानुदात्तस्वरितकम्प-उत्स्वरित-प्रचय-शिवकोदात्तसहितमुच्चारणम् |
| २ | इन्द्रदेवमन्त्रज्ञानम् | २.१ सम्बद्धदेवतागतमन्त्राणां सस्वरं श्रवणम्, श्रवणानुरूपमुच्चारणञ्च<br>२.२ निर्दिष्टमन्त्राणां हस्तस्वरन्यासपूर्वकं पठनम्<br>२.३ निर्दिष्टमन्त्राणां सस्वरं सशुद्धि लेखनम् |

| | | |
|---|---|---|
| | | २.४ गानाधारमन्त्राणां सस्वरं प्रयोगसामर्थ्योत्पादनम्<br>२.५ उदात्तानुदात्तस्वरितकम्प-उत्स्वरित-प्रचय-शिवकोदात्तसहितमुच्चारणम् |
| ३ | आर्चिकस्वरोदाहरणान्वेषणम् | ३.१ उदात्तानुदात्तस्वरितस्वरनिर्धारणपूर्वकं तत्परिगणितुम्<br>३.२ कम्प-उत्स्वरित-प्रचयस्वरशिवकोदात्त- स्वरान् प्रस्तोतुम्<br>३.३ निर्दिष्टमन्त्रेषु स्वराणाम् उदाहरणानि निर्धारयितुम्<br>३.४ स्वराणां चिह्नसंकेतनं विदधातुम् |
| ४ | विश्वेदेवादिगानाध्ययनम् | ४.१ आग्नेय-ऐन्द्रपर्वसम्बद्धविश्वेदेवादिसामनामानि तन्मन्त्रप्रतीकानि निर्दिश्य पठनं लेखनञ्च<br>४.२ क्रुष्ट-प्रथम-द्वितीय-तृतीय-चतुर्थ-मन्द्रातिस्वार्याणां सप्तस्वराणां निर्धारणपूर्वकं सामगानोच्चारणम्<br>४.३ नमन-अभिगीत-विनत-प्रेङ्खाप्रभृति-अवान्तरस्वरनिर्धारणेन साकं गानपठनम्<br>४.४ ससम्प्रदायं गुरुमुखोच्चारणपूर्वकं गानपठनम्<br>४.५ दीप्तायतामृदुमध्यमाकरुणश्रुतीनां परिगणनपूर्वकमेकस्वरेण पठनम् |
| ५ | रुद्र-इन्द्रस्तुतिगानानामध्ययनम् | ५.१ ऐन्द्रपर्वसम्बद्धसामनामानि तन्मन्त्रप्रतीकानि निर्दिश्य पठनं लेखनञ्च<br>५.२ क्रुष्ट-प्रथम-द्वितीय-तृतीय-चतुर्थ-मन्द्रातिस्वार्याणां सप्तस्वराणां निर्धारणपूर्वकं सामगानोच्चारणम्<br>५.३ नमन-अभिगीत-विनत-प्रेङ्खाप्रभृति-अवान्तरस्वरनिर्धारणेन साकं गानपठनम्<br>५.४ ससम्प्रदायं गुरुमुखोच्चारणपूर्वकं गानपठनम्<br>५.५ दीप्तायतामृदुमध्यमाकरुणश्रुतीनां परिगणनपूर्वकमेकस्वरेण पठनम् |
| ६ | स्वरविशिष्टसामगानाध्ययनम् | ६.१ सामगानस्य स्वरप्राधान्यसंसूचनम्<br>६.२ परिगणितसामगानेषु स्वरवैशिष्ट्यान्वेषणम्<br>६.३ स्वरोच्चारणस्य परम्परागतविधिनिदर्शनम्<br>६.४ स्वरविशिष्टतायाः समभिव्यक्तौ लेखने च |
| ७. | स्वरश्रुत्यादीनां गानोदाहरणान्वेषणम् | ७.१ स्वराणां श्रुतीनाञ्च चिह्नाधारेण लक्षणाधारेण च स्वरूपनिर्धारणम्<br>७.२ शिक्षाशास्त्रानुसारं सामगानमन्त्रपरिगणनम्<br>७.३ परिलक्षितगानाधारेण स्वरश्रुतिप्रयुक्तगानानामन्वेषणं पठनञ्च<br>७.४ स्वरश्रुतिविशिष्टगानानां समभिव्यक्तौ लेखने च |

| | | |
|---|---|---|
| ८. | स्वरितादिस्वरभेदज्ञानम् | ८.१ जात्य-क्षैप्र-अभिनिहितप्रभृतिसप्तस्वरितलक्षणपठनम्<br>८.२ स्वरितभेदानामुदाहणकथनम्<br>८.३ स्वरितभेदेषु कम्पस्वर-वैयाकरणकयण्-पूर्वरूप-दीर्घसन्धिस्वरूपान्वेषणम्<br>८.४ कम्प-शिवकोदात्तस्वरलक्षणोदाहरणपठनम् |
| ९. | नारदीयशिक्षाध्ययनम् | ९.१ संहितापदपाठगतस्वरवैशिष्ट्यम्<br>९.२ अवग्रहलक्षणोदाहरणपठनम्<br>९.३ विवृत्ति-रङ्गोच्चारणस्वरूपान्वेषणम्<br>९.४ पञ्चविधाचार्य-सामगानस्वरसौक्ष्म्यलक्षणोदाहरणपठनम् |
| १० | स्वरमात्राज्ञानम् | १०.१ अभिगीत-प्रणतकम्पादिसामस्वरनिर्धारणपूर्वकं मात्राविषयक-स्वरूपावधारणम्<br>१०.२ एकमात्रा-द्विमात्रा-वृद्ध-पद-दीर्घ-मात्रानिदर्शनम्<br>१०.३ मन्त्रोच्चारणे स्वरमात्रा प्रकटनपूर्वकमभिव्यक्तौ लेखने च |

## ४. विषयक्षेत्रं क्रमश्च

**कक्षा ९**

| क्र.सं. | विषयाः | ग्रन्थसङ्केतः | बोधाः | अभिव्यक्तयः | शिक्षण-घण्टाः | पूर्णाङ्काः |
|---|---|---|---|---|---|---|
| १ | अग्न्यादिदेवता-सम्बद्धमन्त्राः | सामवेदसंहिता आग्नेयपर्वणः१-४ दशतयः | १.सम्बद्धदेवतागतमन्त्रस्वरूपम्<br>२.निर्दिष्टमन्त्राणां हस्तस्वरन्यासः<br>३.उदात्तानुदात्तस्वरितकम्प-उत्स्वरित-प्रचय-शिवकोदात्तस्वराः | १.सम्बद्धदेवतागतमन्त्राणां सस्वरं श्रवणम्, श्रवणानुरूपमुच्चारणञ्च<br>२.निर्दिष्टमन्त्राणां हस्तस्वरन्यासपूर्वकं पठनम्<br>३. निर्दिष्टमन्त्राणां सस्वरं सशुद्धि लेखनम्<br>४.गानाधारमन्त्राणां सस्वरं प्रयोगसामर्थ्योत्पादनम्<br>५.उदात्तानुदात्तस्वरितकम्प-उत्स्वरित-प्रचय-शिवकोदात्तसहितमुच्चारणम् | १३ | ८ |
| २. | अग्निपूषाविश्वे-देवब्रह्मणस्पति-सम्बद्धमन्त्राः | सामवेदसंहिता आग्नेयपर्वणः५-८ दशतयः | १.सस्वरं साममन्त्रपाठः<br>२.हस्ते स्वरन्यासः<br>३.गानाधारमन्त्रबोधः<br>४.उदात्तानुदात्तस्वरितस्वराः<br>५.कम्प-उत्स्वरित-प्रचय-शिवकोदात्तस्वराः | १.सम्बद्धदेवतागतमन्त्राणां सस्वरं श्रवणम् श्रवणानुरूपमुच्चारणञ्च<br>२.निर्दिष्टमन्त्राणां हस्तस्वरन्यासपूर्वकं पठनम्<br>३. निर्दिष्टमन्त्राणां सस्वरं सशुद्धि लेखनम्<br>४.गानाधारमन्त्राणां सस्वरं प्रयोगसामर्थ्यमुत्पादनम्<br>५.उदात्तानुदात्तस्वरितकम्प-उत्स्वरित-प्रचय-शिवकोदात्तसहितमुच्चारणम् | १३ | ८ |
| ३ | अग्निदेवमन्त्राः | सामवेदसंहिता आग्नेयपर्वणः ९-१० | १.सस्वरं साममन्त्रपाठः<br>२.हस्ते स्वरन्यासः | १.सम्बद्धदेवतागतमन्त्राणां सस्वरं श्रवणम्, | ७ | ५ |

| | | | | | | |
|---|---|---|---|---|---|---|
| | | दशतिः | ३.गानाधारमन्त्रबोधः<br>४.उदात्तानुदात्तस्वरितस्वराः<br>५.कम्प-उत्स्वरित-प्रचय-शिवकोदात्तस्वराः | श्रवणानुरूपमुच्चारणञ्च<br>२.निर्दिष्टमन्त्राणां हस्तस्वरन्यासपूर्वकं पठनम्<br>३. निर्दिष्टमन्त्राणां सस्वरं सशुद्धि लेखनम्<br>४.आर्चिकमन्त्राणां सस्वरं प्रयोगसामर्थ्यमुत्पादनम्<br>५.उदात्तानुदात्तस्वरितकम्प-उत्स्वरित-प्रचय-शिवकोदात्तसहितमुच्चारणम् | | |
| ४. | गायत्र्यादिसाम-गानमन्त्राः | ग्रामेगेयगानाग्नेय-पर्वणः प्रथमार्धप्रपाठकः | १.सस्वरं ससम्प्रदायं गुरुमुखोच्चारणपूर्वकं सामगानपाठः<br>२. गमयत्रादिसामनामानि तन्मन्त्रप्रतीकानि च<br>३. क्रुष्ट-प्रथम-द्वितीय-तृतीय-चतुर्थ-मन्द्रातिस्वार्यस्वराः<br>४.नमन-अभिगीत-विनत-प्रेङ्खाद्यवान्तरस्वराः | १. गायत्रगानादिसामनामानि तन्मन्त्रप्रतीकानि निर्दिश्य पठनं लेखनञ्च<br>२.क्रुष्ट-प्रथम-द्वितीय-तृतीय-चतुर्थ-मन्द्रातिस्वार्याणां सप्तस्वराणां निर्धारणपूर्वकं सामगानोच्चारणम्<br>३.नमन-अभिगीत-विनत-प्रेङ्खाप्रभृति-अवान्तरस्वरनिर्धारणेन साकं गानपठनम्<br>४.ससम्प्रदायं गुरुमुखोच्चारणपूर्वकं गानपठनम् | १३ | ८ |
| ५. | अग्निस्तुतिपरक-गानमन्त्राः | ग्रामेगेयगानाग्नेय-पर्वणः प्रथमप्रपाठक | १.सस्वरं ससम्प्रदायं गुरुमुखोच्चारणपूर्वकं सामगानपाठः<br>२.अग्निस्तुतिपरकसामनामानि तन्मन्त्रप्रतीकानि च<br>३.क्रुष्ट-प्रथम-द्वितीय-तृतीय-चतुर्थ-मन्द्रातिस्वार्यस्वराः<br>४.नमन-अभिगीत-विनत-प्रेङ्खाद्यवान्तरस्वराः | १. आग्नेयपर्वसम्बद्धसामनामानि तन्मन्त्रप्रतीकानि निर्दिश्य पठनं लेखनञ्च<br>२.क्रुष्ट-प्रथम-द्वितीय-तृतीय-चतुर्थ-मन्द्रातिस्वार्याणां सप्तस्वराणां निर्धारणपूर्वकं सामगानोच्चारणम्<br>३.नमन-अभिगीत-विनत-प्रेङ्खाप्रभृति- | १३ | ८ |

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | अवान्तरस्वरनिर्धारणेन साकं गानपठनम्<br>४.ससम्प्रदायं गुरुमुखोच्चारणपूर्वकं गानपठनम्<br>५.दीप्तायतामृदुमध्यमाकरुणश्रुतीनां परिगणनपूर्वकमेकस्वरेण पठनम् | | |
| ६. | रुद्रादिगानम् | ग्रामेगेयगानाग्नेय-पर्वणः द्वितीयप्रपाठकः | १.सस्वरं ससम्प्रदायं गुरुमुखोच्चारणपूर्वकं सामगानपाठः:<br>२.रुद्रादिसामनामानि तन्मन्त्रप्रतीकानि च<br>३.क्रुष्ट-प्रथम-द्वितीय-तृतीय-चतुर्थ-मन्द्रातिस्वार्यस्वराः<br>४.नमन-अभिगीत-विनत-प्रेङ्खाद्यान्तरस्वराः | १.पठितेषुगानेषुसप्तस्वर-अवान्तरस्वरान् निर्धार्य प्रदर्शनम्<br>२.निर्दिष्टगानेषु सप्तस्वर-अवान्तरस्वराणामुदाहर-णान्वेषणम्<br>३.निर्दिष्टगानेषुपञ्चश्रुतीनांसोदाहरण मुच्चारणं लेखनञ्च<br>४.गानेषुतान-मूर्च्छना-रागाणामुदाहरणान्वेषणम् | १३ | ८ |
| ७ | स्वरादीनां गानमुदाहरणञ्च | ग्रामेगेयगानाग्नेय-पर्वणः १-२ प्रपाठकः | १.स्वराः श्रुतयश्च<br>२.स्वराणां श्रुतीनाञ्च चिह्नानि<br>३.प्रपाठकखण्डेषु सामगानमन्त्रसंख्या<br>४.स्वरश्रुतिप्रयुक्तगानानि | १.पठितेषुगानेषुसप्तस्वर-अवान्तरस्वरान् निर्धार्य प्रदर्शनम्<br>२.निर्दिष्टगानेषु सप्तस्वर-अवान्तरस्वराणामुदाहर-णान्वेषणम्<br>३.निर्दिष्टगानेषुपञ्चश्रुतीनामुदाहरणोच्चारणं लेखनञ्च<br>४.गानेषुतान-मूर्च्छना-रागाणामुदाहरणान्वेषणम् | ७ | ५ |
| ८. | सामशिक्षा | नारदीयशिक्षायाः प्रथमप्रपाठकः | १.संहिता<br>२.मूलस्वराः<br>३.पशुपक्षिध्वनयः<br>४.शुद्धस्वरोच्चारणस्य फलानि | १.संहिताध्ययनोद्देश्यप्रदर्शनम्<br>२.मूलस्वरनिर्धारणपूर्वकं स्वरद्वैविध्य-त्रैविध्यनिरूपणम्<br>३.पारम्परिकस्वरोच्चारणरीति- | १६ | १० |

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | ५.शास्त्रीयसङ्गीतस्वराः<br>६.दीप्तायतामृदुमध्यमाकरुण-श्रुतयः | मवलम्व्य पशुपक्षिध्वनि तोलनपूर्वकं याथातथ्यस्वरोच्चारणं शुद्धस्वरोच्चारणस्य फलावबोधश्च<br>४.शास्त्रीयसङ्गीतस्वरमूलम् सामस्वरकथनम्<br>५.दीप्तायतामृदुमध्यमाकरुण-श्रुतीनां परिचयप्रापणम | | |
| ९. | गान्धर्ववेदः | शास्त्रीयसङ्गीतस्य स्वरश्रुत्यादिविषया | १.गान्धर्वशब्दः उपवेदश्च<br>२.सामस्वराः शास्त्रीयसङ्गीत स्वराश्च<br>३.नारदीयशिक्षा-सङ्गीतरत्नाकरगतविषय-प्रस्तुतिशैली | १. गान्धर्वशब्दपरिचयेन साकं गान्धर्वस्योपवेदत्वपरिचय-कथनम्<br>२.सामस्वरप्रभावितान् शास्त्रीयसङ्गीतस्वरान् प्रस्तोतुम्<br>३.नारदीयशिक्षा-सङ्गीतरत्नाकरगतविषय-प्रस्तुतिशैलीविमर्शनम् | १२ | ७ |
| १० | वेदाध्ययनविधिः | नारदीयशिक्षायाः प्रथमप्रपाठकः | १.वेदाध्ययनपरम्परा<br>२. अध्ययनविधिप्रबोधः:<br>३. हस्तयोरङ्गुलिन्यास<br>४.नारदीयशिक्षाया विषयप्रस्तुतिशैली | १. ससम्प्रदायम् आचार्यकृतां वेदाध्ययनपरम्परां विमृश्य अध्ययनविधेर्व्याख्यानम्<br>२.गोकर्णवद्धस्तस्थापनम्, हस्तयोरङ्गुलिन्यासः, उच्चारणस्य विधिप्रबोधनम्<br>३.नारदीयशिक्षाया विषयप्रस्तुतिशैलीविमर्शनम् | १३ | ८ |
| सैद्धान्तिकाभ्यासः | | | | | १२० | ७५ |
| प्रयोगाभ्यासः | | | | | ४० | २५ |
| योगः | | | | | १६० | १०० |

**कक्षा १०**

| क्र.सं. | विषयाः | ग्रन्थसङ्केतः | बोधाः | अभिव्यक्तयः | शिक्षण-घण्टाः | पूर्णाङ्काः |
|---|---|---|---|---|---|---|
| १ | गानाधारर्चः | सामवेदसंहितायाः ११-१२ दशतयः ऐन्द्रपर्वणः १-४ दशतयश्च | १.सस्वरं साममन्त्रपाठविधिः<br>२.हस्ते स्वरन्यासः<br>३.गानाधारमन्त्रबोधः<br>४.उदात्तानुदात्तस्वरितस्वराः<br>५.कम्प-उत्स्वरित-प्रचय-शिवकोदात्तस्वराः | १.ऋग्गानयोः सम्बन्धप्रकटनम्<br>२.साममन्त्राणां हस्तस्वरन्यासपूर्वकं पठनम्<br>३.साममन्त्राणां सस्वरं सशुद्धि लेखनम्<br>४.गानाधारमन्त्राणां सस्वरं प्रयोगसामर्थ्योत्पादनम्<br>५.उदात्तानुदात्तस्वरितकम्प-उत्स्वरित-प्रचय-शिवकोदात्तसहितं गानाधारर्गुच्चारणम् | १५ | ९ |
| २. | इन्द्रदेवमन्त्राः | सामवेदसंहिता ऐन्द्रपर्वणः५-८ दशतयः | १.सस्वरं साममन्त्रपाठविधिबोधः<br>२.हस्ते स्वरन्यासः<br>३.गानाधारमन्त्रबोधः<br>४.उदात्तानुदात्तस्वरितस्वराः<br>५.कम्प-उत्स्वरित-प्रचय-शिवकोदात्तस्वराः | १.सम्बद्धदेवतागतमन्त्राणां सस्वरं श्रवणम्, श्रवणानुरूपमुच्चारणञ्च<br>२.निर्दिष्टमन्त्राणां हस्तस्वरन्यासपूर्वकं पठनम्<br>३. निर्दिष्टमन्त्राणां सस्वरं सशुद्धि लेखनम्<br>४.गानाधारमन्त्राणां सस्वरं प्रयोगसामर्थ्योत्पादनम्<br>५. उदात्तानुदात्तस्वरितकम्प-उत्स्वरित-प्रचय-शिवकोदात्तसहितं गानाधारर्गुच्चारणम् | ९ | ७ |
| ३ | आर्चिकस्वरोदाहरणान्वेषणम् | सामवेदसंहिता ऐन्द्रपर्वणः १-८ दशतयः | १.गुरुमुखोच्चारणानुरूपं लयप्रभेदः<br>२. उदात्तानुदात्तस्वरितस्वर पठनबोधः | १. सचिह्नम् उदात्तानुदात्तस्वरितस्वरोच्चारणम्<br>२. सचिह्नं कम्प-उत्स्वरित- | ६ | ४ |

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | ३. कम्प-उत्स्वरित-प्रचयस्वरबोधः<br>४. शिवकोदात्त-उत्कलाकोशादिस्वर पठनबोधः<br>५.स्वराणाम् सचिह्नम् उदाहरणबोधः<br>६.आर्चिकमन्त्रप्रपाठकाध्यायखण्डदशतिषु आर्चिक मन्त्रसंख्या<br>७. आर्चिकस्वरप्रयुक्तमन्त्रचयनम् | प्रचयस्वरबोधः<br>३. सचिह्न शिवकोदात्त-उत्कलाकोशादिस्वर पठनबोधः<br>४.सचिह्नं स्वराणाम् उदाहरणान्वेषणम्<br>५.सचिह्नं स्वराणाम् उदाहरणलेखनम्<br>६.आर्चिकमन्त्रप्रपाठकाध्यायखण्डदशतिषु आर्चिक मन्त्रसंख्यालेखनम् | | |
| ४. | विश्वेदेवादि-गानमन्त्राः | ग्रामेगेयगानाग्नेयपर्वणः तृतीयार्धप्रपाठकः | १. सस्वरं ससम्प्रदायं गुरुमुखोच्चारणपूर्वकं सामगानपाठः<br>२.विश्वेदेवादिसामनामानि तन्मन्त्रप्रतीकानि च<br>३.क्रुष्ट-प्रथम-द्वितीय-तृतीय-चतुर्थ-मन्द्रातिस्वार्यस्वराः<br>४.नमन-अभिगीत-विनत-प्रेङ्खाद्यवान्तरस्वराः | १. सस्वरं सामगानोच्चारणम् विश्वेदेवादि-सम्बद्धसामनामानि तन्मन्त्रप्रतीकानि निर्दिश्य पठनं लेखनञ्च<br>२. क्रुष्ट-प्रथम-द्वितीय-तृतीय-चतुर्थ-मन्द्रातिस्वार्याणां सप्तस्वराणां निर्धारणपूर्वकं सामगानोच्चारणम्<br>३.नमन-अभिगीत-विनत-प्रेङ्खाप्रभृति-अवान्तरस्वरनिर्धारणेन साकं गानपठनम्<br>४.ससम्प्रदायं गुरुमुखोच्चारणपूर्वकं | १९ | १४ |

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | गानपठनम्<br>५.दीप्तायतामृदुमध्यमा-करुणश्रुतीनां परिगणनपूर्वकमेकस्वरेण पठनम् | | |
| ५. | रुद्र-इन्द्रस्तुति-गानमन्त्राः | ग्रामेगेयगानाग्नेयपर्वणः तृतीयप्रपाठकः | १. सस्वरं ससम्प्रदायं गुरुमुखोच्चारणपूर्वकं सामगानपाठः<br>२.विश्वेदेवादिसामनामानि तन्मन्त्रप्रतीकानि<br>३.क्रुष्ट-प्रथम-द्वितीय-तृतीय-चतुर्थ-मन्द्रातिस्वार्यस्वराः<br>४.नमन-अभिगीत-विनत-प्रेङ्खाद्यवान्तरस्वराः | १. सस्वरं सामगानोच्चारणम् ऐन्द्रपर्वसम्बद्धसामनामानि तन्मन्त्रप्रतीकानि निर्दिश्य पठनं लेखनञ्च<br>२. क्रुष्ट-प्रथम-द्वितीय-तृतीय-चतुर्थ-मन्द्रातिस्वार्याणां सप्तस्वराणां निर्धारणपूर्वकं सामगानोच्चारणम्<br>३.नमन-अभिगीत-विनत-प्रेङ्खाप्रभृति-अवान्तरस्वरनिर्धारणेन साकं गानपठनम्<br>४.ससम्प्रदायं गुरुमुखोच्चारणपूर्वकं गानपठनम्<br>५.दीप्तायतामृदुमध्यमा-करुणश्रुतीनां परिगणनपूर्वकमेकस्वरेण पठनम् | ९ | ६ |
| ६. | स्वरविशिष्टसाम गानमन्त्राः | ग्रामेगेयस्यः चतुर्थप्रपाठकः | १.सस्वरं ससम्प्रदायं गुरुमुखोच्चारणपूर्वकं सामगानपाठः:<br>२.साम्नां स्वरवेदः<br>३.स्वरलयभेदः<br>४.स्वरोच्चारणविधिः<br>५.विशेषस्वराः | १. सस्वरं सामगानोच्चारणम्<br>२. सामगानस्य स्वरप्राधान्यसंसूचनम्<br>३.परिगणितसामगानेषुस्वरवैशिष्ट्यान्वेषणम्<br>४. स्वरोच्चारणस्य परम्परागतविधिनिदर्शनम्<br>५.स्वरविशिष्टतायाः | ११ | ७ |

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | समभिव्यक्तौ लेखने च | | |
| ७ | स्वरश्रुत्यादीनां गानोदाहरणानि | ग्रामेगेयगानस्यः ३-४ प्रपाठक | १.गानस्वराः श्रुतयश्च<br>२.गानगतस्वराणां श्रुतीनाञ्च चिह्नानि<br>३.सामगानमन्त्रप्रपाठकखण्डेषु सामगानमन्त्रसंख्या<br>४.स्वरश्रुतिप्रयुक्तगानचयनम् | १. स्वरप्रयुक्तगानचयनं तदुच्चारणञ्च<br>२. स्वराणां श्रुतीनाञ्च चिह्नाधारेण लक्षणाधारेण च स्वरूपनिर्धारणम् ।<br>३.शिक्षाशास्त्रानुसारं सामगानमन्त्रप्रपाठकखण्ड परिगणनम्<br>४. परिलक्षितगानाधारेण स्वरश्रुतिप्रयुक्तगानानामन्वेषणं पठनञ्च<br>५.स्वरश्रुतिविशिष्टगानानां समभिव्यक्तौ लेखने च | ९ | ६ |
| ८. | स्वरितादिस्वरभेदाः | नारदीयशिक्षायाः द्वितीयप्रपाठकः | १.स्वरितभेदाः<br>२.स्वरितभेदोदाहरणानि<br>३.कम्पस्वरः<br>४. वैयाकरणकयण्-पूर्वरूप-दीर्घसन्धयः<br>५.शिवकोदात्तस्वरोदाहरणम्<br>६.स्वरितभेदोहरण-प्रतिपादकश्लोकाः | १. स्वरितभेदस्वरूप प्रतिपादकश्लोकोच्चारणं सोदाहरणं तदर्थकथनम्<br>२. जात्य-क्षैप्र-अभिनिहितप्रभृतिसप्तस्वरितलक्षणपठनम्<br>३.स्वरितभेदानामुदाहण-कथनम्<br>४.स्वरितभेदवरूपप्रतिपादक-श्लोकोच्चारणम्, सोदाहरणं तदर्थकथनम्<br>५.स्वरितभेदेषु कम्पस्वर-वैयाकरणकयण्-पूर्वरूप-दीर्घसन्धिस्वरूपान्वेषणम्<br>६.कम्प-शिवकोदात्तस्वर-लक्षणोदाहरणपठनम् | १५ | ९ |
| ९. | नारदीयशिक्षा | नारदीयशिक्षायाः द्वितीयप्रपाठकः | १.कम्पस्वरचिह्नम्<br>२.कम्पादिस्वरप्रतिपादक- | १. कम्पादिस्वरप्रतिपादक-लक्षण-पठनं तदर्थलेखनम् | ११ | ६ |

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | वाक्यानि<br>३.संहितापदपाठस्वराः<br>४.अवग्रहोदाहरणम्<br>५. विवृत्तिनामोदाहरण-रङ्गोच्चारणविधिः<br>६.आचार्यत्वभेदाः<br>७.तुम्बरुप्रभृतिगायकाः | २. संहितापदपाठगतस्वर-वैशिष्ट्यम्<br>३.अवग्रहलक्षणोदाहरण-पठनम्<br>४. विवृत्ति-रङ्गोच्चारण-स्वरूपान्वेषणम्<br>५.पञ्चविधाचार्य-सामगानस्वरसौक्ष्म्य-लक्षणोदाहरणपठनम् | | |
| १० | स्वरमात्राः | लोमशीशिक्षायाः १ खण्डः समग्रः,२(१-४श्लोकाः, ५(२-८ श्लोकाः, ८ (७-१४ श्लोकाः) | १.स्वरमात्रालक्षणवाक्यम्<br>२. अभिगीत-प्रणतकम्पादिस्वराः<br>३.एकमात्रा-द्विमात्रा-वृद्ध-पद-दीर्घ-मात्राः<br>४.एकमात्रा-द्विमात्रा-वृद्ध-पद-दीर्घ-मात्रोदाहरणानि | १. स्वरमात्राप्रतिपादक-श्लोकपठनं तदर्थलेखनम्<br>२. अभिगीत-प्रणतकम्पादि-सामस्वरनिर्धारणपूर्वकं मात्राविषयक-स्वरूपावधारणम्<br>३.एकमात्रा-द्विमात्रा-वृद्ध-पद-दीर्घ-मात्रानिदर्शनम्<br>४.मन्त्रोच्चारणे स्वरमात्रा प्रकटनपूर्वकमभिव्यक्तौ लेखने च | १५ | ७ |
| सैद्धान्तिकाभ्यासः | | | | | १२० | ७५ |
| प्रयोगाभ्यासः | | | | | ४० | २५ |
| योगः | | | | | १६० | १०० |

## ५. परियोजनाकार्यमन्ये क्रियाकलापाश्च

इमे क्रियाकलापाः सम्भाव्याः सन्ति । एतान् क्रियाकलापान् निदर्शनस्वरुपेण मत्वा अन्येऽपि क्रियाकलापाः सञ्चालयितुं शक्यन्ते ।

| क.सं. | क्षेत्रम् | परीक्षणीयतोवानि | मूल्याङ्कनस्य पक्षाः | शिक्षणघण्टाः |
|---|---|---|---|---|
| १ | उपस्थितिः | उपस्थितिः | दैनिकोपस्थितेरभिलेख | |
| २. | निर्माणात्मकः क्रियाकलापः | परियोजनाकार्यम् | १.पठनकाले पाठ्यक्रमस्थमन्त्रगतोच्चारणभिन्नताविषयक्याः सूचनायाः सङ्कलनम्, सूचिबद्धतया प्रस्तुतीकरणञ्च । २.साममन्त्राणामेकत्रीकरणम्, देवसम्बद्धमन्त्रवर्गीकरणम्, वाक्यवाक्यांशचयनम्, स्वरश्रुत्यादिगतमन्त्रोदारणसूचिनिर्माणम्, तत्प्रस्तुतीकरणम् | ४ |
| ३. | श्रवणम् | गुरुमुखश्रुतप्रदर्शनम्, अनुवाचनम् लेखनञ्च | गुरुमुखश्रुतेन स्वरश्रुत्यादीनां परिचयकथनम्, मन्त्रश्रवणपूर्वकं तदनुवाचनम् सप्तस्वराणां पशुपक्षिध्वनिभिः सह तोलनम्, विषयवस्तुविमर्शनम्, प्रतिक्रियाप्रदानम्, श्रुतमन्त्राणां लेखनञ्च । | २ |
| ४ | भाषणम् | उच्चारणम् | पठितमन्त्राणां सस्वरमुच्चारणम् | २ |
| | | पद्यवाचनम् | निर्धारितानाम् ऋक्पाठानां हस्तसञ्चालनपूर्वकं वाचनम् | २ |
| | | गानवाचनम् | निर्धारितानां गानानां हस्तसञ्चालनपूर्वकं गायनम् | २ |
| | | भाषिकप्रयोगः | ऋक्पाठस्वर-गानस्वरभिन्नताकथनम्, ऋङ्मन्त्र-गानमन्त्रोच्चारणम्, प्रयोगेषुसाममन्त्रोच्चारणम् | २ |
| ५. | प्रयोगः | मध्यमवृत्ति-द्रुतवृत्त्योः प्रयोगः | अभ्यासार्थ द्रुतवृत्तेः, प्रयोगकाले मध्यमवृत्तेः । | ५ |
| | | हस्ताङ्गुलिचालनम् | ऋक्पाठ-गानपाठयोः हस्तोपरि स्वरविन्यासः | २ |
| ६. | पठनम् | पठनबोधः | सामस्वरचिह्नं विलोक्य व्याख्यातुम्, पठितपाठेभ्यस्तत्सम्बद्धान् प्रश्नान् निर्मातुञ्च कथयित्वा सक्षमतायाः परीक्षणम् । | २ |
| ७ | लेखनम् | पद-वाक्य-वाक्यांशानां समग्रमन्त्राणां वा लेखनम् | पद-वाक्य-वाक्यांशानां सस्वरं समग्रमन्त्राणां वा लेखनम्, श्रुतिलेखनम्, | २ |
| | | गृहकायादिषु लेखनम् | मन्त्रलेखनम्, प्रश्नोत्तरलेखनम्, | २ |
| | | सुन्दराक्षरलेखनम् | अक्षराणामङ्गानां चिह्नानाञ्च सुस्पष्टलेखनम् | २ |
| ८ | प्रदर्शनम् | वाग्व्यवहारः | मन्त्राणामुच्चारणे प्रयोगे च मात्राणां वाचाञ्च | २ |

| | | | | |
|---|---|---|---|---|
| | | | स्पष्टता | |
| | | कक्षाक्रियाकलापः, सक्रियताशिक्षणम् | कक्षाकार्यस्य, गृहकार्यस्य, प्रदर्शनम्, वैयक्तिक-सामूहिककार्येषुनेतृत्वस्य प्रदर्शनम्, | २ |
| | | हस्तसञ्चालनम् | हस्तोपरि स्वरविन्यासः | २ |
| ९ | परीक्षा | आवधिकपरीक्षणम् | आकस्मिक-नियमितपरीक्षया समुपलब्धे परीक्षणम् | ५ |
| योगः | | | | ४० |

## ६. शिक्षणसञ्चालनप्रक्रिया

वेदविषयस्य शिक्षणोपक्रमे शिक्षकैर्वार्षिकीं दैनिकीं वा पाठयोजनाञ्च निर्माय शिक्षणसहजीकरणं कर्त्तव्यम् । सोद्देश्यं छात्राणां पाठश्रवणस्य अनुश्रवणस्य पाठ्यविषयान्तर्गतानां विविधपक्षाणां नैसर्गिकप्रतिभया मिननपूर्वकं प्रश्नोत्तरलेखनस्य शिल्पविकासाय शिक्षकैर्दत्तचित्तैः प्रेरणाप्रदैश्च भवितव्यम् । कक्षायां विषयानुसारेण प्रश्नोत्तर-लेखन-प्रयोगाभ्यास-विमर्शादिकार्ये शिक्षकैरेवच्छात्राः प्रेरयितव्याः । पाठ्यविषयाणां पाठ्यवस्तुनां वा प्रकृत्यनुसारमेव चिन्तन-मनन-अभ्यास-प्रश्नोत्तरलेखनादिकार्ये शिक्षकैरेवच्छात्राः प्रेरणीयाः ।

शिक्षणसहजीकरणप्रक्रियायां सुखासनस्थितिपूर्वकं गुरुमुखोच्चारणानुच्चारणानुकूलोच्चारणम्, समूहोच्चारणम्, प्रश्नप्रतिप्रश्नः, श्यामपट्टाङ्कनम्, श्रव्यदृश्योपकरणप्रंयोगः, हस्तस्वरप्रदर्शनम्, मुखस्वरोच्चारणम्, एकैकोच्चारणम् व्याख्यानम्, अन्वयकरणम्, पर्यायशिक्षणम्, भावार्थप्रकाशनम्, मन्त्र-श्लोकोच्चारणानुशिक्षणं कर्त्तव्यम्, सम्बद्धपरिभाषिकशब्दप्रयोगं विधाय तेषां लाक्षणिकविषयवस्तुबोधे सान्वयं सोदाहरणं छात्राः प्रशिक्षणीयाः । शिक्षकैः शिक्षणकार्ये विषयवस्तुनां सामान्यपरिचयमुद्देश्यकथनं प्रस्तुतिविधिञ्च बोधयित्वाच्छात्रेभ्यस्तत्सम्बद्धं कक्षाकार्यं गृहकार्यञ्च प्रदेयम् । अधोलिखितानामभ्यासप्रधानानां सिर्जनात्मकानाञ्च क्रियाकलापानां सम्पादनमावश्यकं भवति-

(क) समुच्चारणम् (ख) अभ्यासः (ग) उत्पादनम् (घ) पठनबोधः
(ङ) प्रयोगात्मकम् (च) श्रवणम् (छ) आत्ममूल्याङ्कनम्

## ७. विद्यार्थिमूल्याङ्कनप्रक्रिया

स्तरस्यास्य विद्यार्थिमूल्याङ्कनप्रक्रिया सम्प्रति प्रचलिताक्षराङ्कनपद्धत्या विधीयते । मूल्याङ्कने निर्माणात्मकं निर्णयात्मकञ्चेति प्रक्रियाद्वयमवलम्ब्यते ।

### (क) निर्माणात्मकमूल्याङ्कनम्

कक्षाकार्य-गृहकार्य-कक्षासहभागिता-प्रकरणपरीक्षा-पाक्षिकपरीक्षा-मासिकपरीक्षामाध्यमेन विद्यार्थिनां योग्यताभिवृद्धये प्रयासो विधीयते । एवमेव शिक्षणक्रमे शिक्षणदुर्बलविद्यार्थिभ्यो व्यावहारिकपरिवर्तनाय तेषां कृते शिक्षणकार्यस्य सहजीकरणायोपयुक्तवातावरणनिर्माणं क्रियते । तत्क्रमे स्तरानुगतयोग्यताभिवृद्धये सामूहिकविमर्शन-मौखिकपरीक्षालिखितपरीक्षाप्रत्युत्पन्नमतिप्रदर्शन-प्रश्नोत्तरण-कक्षाकार्यपरीक्षणप्रभृतिकार्यै-र्निर्माणात्मकं मूल्याङ्कनं विधीयते । माध्यमेनानेन विद्यार्थिनां योग्यतावृद्धिर्भवेत् ।

### (ख) निर्णयात्मकमूल्याङ्कनम्

पाठ्यक्रमस्योद्देश्यानुरूपं ज्ञानं विद्यार्थिभ्यो प्रापितं नवेति स्पष्टीकरणार्थमावधिकरूपेण मूल्याङ्कनं कृत्वा छात्राणां योग्यतानिर्धारणं क्रियते । स्तरोन्नतये कक्षोन्नतये च शैक्षिकसत्रस्यान्ते निर्णयात्मकमूल्याङ्कनमन्तिमपरीक्षाया माध्यमेन विधीयते । प्रायशस्त्रैमासिक परीक्षारूपेण षाण्मासिकपरीक्षारूपेण वार्षिकपरीक्षारूपेण च तादृशो निर्णयः क्रियते ।

मूल्याङ्कनप्रणालीं विश्वसनीयां विधिसम्मताञ्च विधायैकरूपतामानेतुं स्थानीय-प्रादेशिक-राष्ट्रियस्तरीयाणां बाह्यसार्वजनिकपरीक्षणं सर्वेषु विषयेष्वान्तरं बाह्या च मूल्याङ्कनपद्धतिः क्रियान्वयन आनीयते । सार्वजनिकपरीक्षायाः प्रत्येकं विषये प्रतिशतं पञ्चविंशत्यङ्कानामान्तरिकं प्रतिशतं पञ्चसप्तत्यङ्कानां बाह्यमूल्याङ्कनं भवति । आन्तरं मूल्याङ्कनं सम्बद्धविद्यालयस्य शिक्षकेण विधातव्यम् । शिक्षणप्रक्रियया सहैव विषयवस्तुनो मूल्याङ्कनं निरन्तरं विधेयम् । औपचारिकेणानौपचारिकेण च शिक्षणोपलब्धिः क्रमेण परिमापणीया । शिक्षणसहजीकरणस्य क्रमे विद्यार्थिभिरधिगतानां ज्ञानशिल्पप्रयोगोच्चदक्षतासम्बद्धपक्षाणां मूल्याङ्कनं कर्तव्यम् ।

**(अ) आन्तरं मूल्याङ्कनम्**

अधोलिखिताधारेणान्तरमूल्याङ्कनं कर्तव्यम् :

| क्र.सं. | क्षेत्रम् | अङ्कभारः |
|---|---|---|
| १. | शिक्षणसहभागिता | ३ |
| २. | कक्षाकार्यं परियोजनाकार्यं वा | ६ |
| ३. | विषयवस्तुगतं मूल्याङ्कनम् | १० |
| ४. | त्रैमासिकपरीक्षा | ६ |
| योगः | | २५ |

**(आ) बाह्यमूल्याङ्कनम्**

निर्णयात्मके बाह्ये वा मूल्याङ्कने पाठ्यक्रमे निर्धारितोद्देश्यानुरूपं छात्रैः ज्ञानम्, शिल्पमधिगतं नवेति सम्परीक्ष्य तदनुसारेण छात्राणामुत्तीर्णत्वमनुत्तीर्णत्वं वा निर्णीयते । एतादृशं मूल्याङ्कनमावधिकं भवति । शैक्षिकसत्रस्यान्त एतद् मूल्याङ्कनं विधीयते ।

## सामवेदविषयस्य विशिष्टीकरणतालिका

**कक्षा : १०** **पूर्णाङ्का:७५**
**समयः घण्टात्रयम्**

| क्र. स. | विषयक्षेत्रम् | प्रश्नप्रकृतिः | ज्ञानम् | | | बोधः | | | शिल्पम् | | | उच्च- दक्षता | | | प्रष्टव्याः प्रश्न-सङ्ख्याः | अङ्क भारः | स्पष्टीकरणम् |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| | | | क | ख | ग | क | ख | ग | क | ख | ग | क | ख | ग | | | |
| १. | गानाधारर्चः | ज्ञानोच्च-दक्षताबोधकौ | १ | - | - | - | - | - | - | - | - | - | - | ८ | २ | ९ | **ज्ञान**क्षेत्रतः-<br>निर्दिष्टगानाधारमन्त्रेषु द्वित्रादिशब्दैरुत्तरप्रदानात्मकः( वस्तुनिष्ठः) एकःप्रश्नः<br>**उच्चदक्षता**क्षेत्रतः-<br>लम्बायमानान् चतुर्मन्त्रान् दत्वा सस्वरं मन्त्रत्रयसमाधानात्मकं प्रश्नैकम् वागानाधारमन्त्र-सामस्वरविश्लेषणात्मक प्रश्नैकम् |
| २. | इन्द्रदेवमन्त्राः | प्रयोगपरकः | - | - | - | - | - | - | - | ५ | - | - | - | - | १ | ५ | **शिल्पक्षेत्रतः**<br>निर्दिष्टमंन्त्रप्रतीकत्रयेषु द्वयोः सस्वरपूरणात्मक एकःप्रश्नः ।<br>त्रयाणां लघुमन्त्रप्रतीकानां द्वयोः सस्वरपूरणात्मकःएकःप्रश्नः । |
| ३. | आर्चिकस्वरोदारणान्वेषणम् | ज्ञान-प्रयोगपरकौः | १ | - | - | - | - | - | - | ५ | - | - | - | - | २ | ६ | **ज्ञान**क्षेत्रतः-<br>निर्दिष्टानाम् आर्चिकस्वराणाम् उदाहरणलेखनसम्बद्धं प्रश्नैकम् ।<br>**शिल्प**क्षेत्रतः-<br>आर्चिकस्वराणा सचिह्न लक्षणलेखनाात्मकमुपप्रश्नद्वयसमन्वितं प्रश्नैकम् । |
| ४. | विश्वेदेवरुद्रादिगान-मन्त्राः | ज्ञान-प्रयोगोच्च-दक्षतापरकाः | १ | - | - | - | - | - | - | ५ | - | - | - | ८ | ३ | १४ | **ज्ञान**क्षेत्रतः-<br>निर्दिष्टानां गानमन्त्राणां सामनामगानप्रतीकलेखनसम्बद्धं प्रश्नैकम् ।<br>**शिल्प**क्षेत्रतः-<br>सामगाननामाानुसारं गानलेखनसम्बद्धमेकसहितं प्रश्नैकम् ।<br>**उच्चदक्षता**क्षेत्रतः-<br>लम्बायमानगानमन्त्रलेखनसम्बद्धं प्रश्नैकम्, ।<br>तदत्रगानप्रतीकत्रयं दत्वा सस्वरं गानद्वयसमाधानात्मकःप्रश्नोः देयः । |
| ५. | इन्द्रस्तुतिगान-मन्त्राः | बोध-प्रयोगपरकौः | - | - | - | १ | - | - | - | ५ | - | - | - | | २ | ६ | **बोध**क्षेत्रतः-<br>प्रदत्तगानमन्त्रे ऋुष्टादिस्वरयुतपर्वलेखनात्मकं प्रश्नैकम् ।<br>**शिल्पक्षेत्रतः** |

| | | | | | | | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| | | | | | | | | | | | | | | | | | निर्दिष्टगानस्वरूपलेखनसम्बद्धः प्रश्नःएकः । |
| ६. | स्वरविशिष्ट-सामगानानि | ज्ञान-बोध-प्रयोगपरकाः | १ | - | - | १ | - | - | - | ५ | - | - | - | - | ३ | ७ | **ज्ञान**क्षेत्रतः-<br>निर्दिष्टानाम् गानमन्त्राणां स्वरचिह्नपर्वलेखनसम्बद्धं प्रश्नैकम् ।<br>**बोध**क्षेत्रतः-<br>प्रदत्तगानमन्त्रे क्रुष्टादिस्वरयुतपर्वलेखनात्मकं प्रश्नैकम् ।<br>**शिल्प**क्षेत्रतः-<br>निर्दिष्टगानस्वरस्वरूपचिन्तनसम्बद्धेन एकेन, सामगानलेखनसम्बद्ध प्रश्नैकसमाधानात्मकं प्रश्नद्वयम् |
| ७ | स्वरश्रुत्यादीनां गानोदाहरणानि | बोध-प्रयोगपरकौ | - | - | - | १ | - | - | - | ५ | - | - | - | - | २ | ६ | **बोध**क्षेत्रतः-<br>स्वरश्रुत्यादीनामुदाहरणलेखनात्मकं वा सामगानमन्त्रप्रपाठकखण्डेषु सामगानमन्त्रसंख्यालेखनात्मकं प्रश्नैकम् ।<br>**शिल्प**क्षेत्रतः-<br>स्वरश्रुतिप्रयुक्तलघुगानस्वरूपलेखनसम्बद्धो वा प्रदत्तसामगानप्रतीकपूरणपूर्वकं स्वरश्रुतिलेखनसम्बः प्रश्नः |
| ८. | स्वरितादिस्वर-भेदाः | बोधोच्चदक्षतापरकौः | - | - | - | १ | - | - | - | | - | - | - | ८ | २ | ९ | **बोध**क्षेत्रतः-<br>स्वरितभेदोदाहरणात्मकद्वित्रादिशब्दैरुत्तरप्रदानात्मकः( वस्तुनिष्ठः) एकःप्रश्नः<br>**शिल्पक्षेत्रतः**<br>प्रदत्तश्लोकव्याख्यात्मकःवा परिचयलेखनात्मकःप्रश्नः । |
| ९. | नारदीयशिक्षा | बोधोच्चदक्षतापरकौ | - | - | - | १ | - | - | ५ | - | - | - | - | | २ | ६ | **बोधक्षेत्रतः-**<br>ऋवग्रह-विवृत्ति-रङ्गचिह्नादिनिर्धारात्मकं वाकम्पादिस्वरप्रयुक्तोदाहरणलेखनात्मकं प्रश्नैकम् ।<br>**उच्चदक्षता**क्षेत्रतः-<br>सामगानस्वर-शास्त्रीयसंगीतस्वरसम्बो वा तुलनात्मकोत्तरलेखनसम्बद्धःःएकः प्रश्नः । |
| १०. | स्वरमात्राः | ज्ञान-बोध-प्रयोगपरकाः | १ | - | - | १ | - | - | - | ५ | - | - | - | - | ३ | ७ | **ज्ञानक्षेत्रतः-**<br>स्वरमात्राचिह्नादिनिर्धारात्मकं वास्वरश्रुतिमात्राप्रयुक्तगानोदाहरणलेखनात्मकं प्रश्नैकम् ।<br>**बोधक्षेत्रतः-** |

| | | | | | | | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| | | | | | | | | | | | | | | | | | स्वरश्रुतिमात्राप्रयुक्तगानोदाहरणलेखनात्मकं प्रश्नैकम् ।<br>**शिल्पक्षेत्रतः**<br>स्वरश्रुतिमात्राणां स्वरूपलेखनात्मकप्रश्नःवा परिचयलेखनात्मकःप्रश्नः |
| योगः | | | ५ | - | - | ६ | - | - | - | ४० | - | - | - | २४ | २२ | ७५ | |

**द्रष्टव्यः** **'क'**इत्यनेन अतिलघुप्रश्नो बोध्यः ।
**'ख'**इत्यनेन लघुप्रश्नो बोध्यः ।
**'ग'**इत्यनेन सामान्यतयाविस्तृतोत्तरापेक्षी (व्याख्यात्मकः) प्रश्नो बोध्यः।
**पुनश्च-** ज्ञानबोधक्षेत्रात् विकल्परहिताः प्रश्नाः प्रष्टव्याः । शिल्पक्षेत्रात् यथेच्छप्रकरणतः प्रश्नद्वयं संयोज्य दश प्रश्नाः प्रष्टव्याश्चेत् उच्चदक्षताक्षेत्रात् यथेच्छप्रकरणत एकं प्रश्नं संयोज्य चत्वारः प्रश्नाः प्रष्टव्याः । तेषु दशसु छात्रैरष्टौ प्रश्नाः समाधेयाश्चेच्चतुर्षु त्रयः प्रश्नाः समाधेयाः ।

# आदर्शप्रश्नपत्रम् १

## विषयः - सामवेदः

कक्षा - १०

पूर्णाङ्काः - ७५

समयः- घण्टात्रयम्

---

*(परीक्षार्थिना यथासम्भवं शुद्धं, स्पष्टं, मौलिकञ्चोत्तरं लेखनीयम्, तादृशमुत्तरं विशिष्यते ।)*

**प्रथमः खण्डः**

**सङ्क्षेपेणोत्तरयत ।** **११X१=११**

१२ ३

१. **ईडिष्वा** इत्यत्र एक-द्वि-त्रि-संख्याभिः के स्वराः सूचिता भवन्ति ?

२. शिवकोदात्तस्वरोदारणमन्त्रस्थस्वरचिह्नं किम् ?

३. 'निवेष्ट्व' इत्यस्य सामनाम्नो गानप्रतीकं किम् ?

४. अतिस्वार्यस्वरस्य चिह्नं किम् ?

५. सामगाने दीर्घस्योदाहरणं लिखत ।

६. कस्मिन् पदे मन्द्रस्वरोऽस्ति ? (प्तमातृभाइ, जज्ञानः सा, सतश्रायाइ, चिकायेऽ३)

२० २उ २०३क २० १ अ

७. अभिगीतस्वरः कुत्र वर्तते ? ( हृणीथाऽ३, आदित्प्रत्ना, भूर्भुवःस्वः, यासत्वा)

८. सामगानस्य तृतीयप्रपाठके कति मन्त्राः सन्ति ? (७५, ७०, ७२ ७९)

९. अभिनिहितस्वरितस्योदारणं केन सन्धिना साम्यमस्ति ? (यण्, पूर्वरूप, दीर्घ, पररूप)

१०. आचार्यत्वस्य पञ्चविधेषु एष वर्तते (करणम्, हरणम्, निदर्शनम्, साधनम् )

११. वृद्धाख्ये कति मात्राः भवन्ति ? (एकमात्रा, द्विमात्रा, त्रिमात्रा, पञ्चमात्रा)

## <u>द्वितीयः खण्डः</u>

**केचनाष्टौ प्रश्नाः समाधेयाः, अन्तिमौ न हेयौ ।** **८ X ५=४०**

१२. यथेच्छं द्वौ मन्त्रौं सस्वरं पूरयत ।

तद्वो गाय । इष्टा होत्रा । सदसस्पतिम् ।

१३. प्रश्नद्वयं समाधेयम्–

(क) कम्पस्वरोदाहरणभूतमार्चिकमन्त्रं निर्धार्य लिखत ।

(ख) कम्पस्वरोदाहरणभूतमार्चिकमन्त्रं विलिख्य तस्य स्वरूपं सचिह्नं प्रदर्शयत ।

१४. सामगाननामानुसारं मन्त्रप्रतीकमवधार्य सस्वरं पूरयत ।

आदित्यम् । संवर्गः ।

१५. यथेच्छं मन्त्रद्वयं सस्वरं विलेखनीयम् ।

४ ५ ४ ४०० ४

(क) पन्यंपन्यमित् (ख) यस्तेनूनांऽ५शतक्रताउ ।

१६. चतुर्थप्रपाठस्याद्यन्त्यौ गानमन्त्रौ सस्वरं प्रपूरणीयौ ।

१७. सामवेदस्य स्वरवेदकथनस्याशयं एकं स्वरविशिष्टगानं सस्वरं प्रपूर्यं समुत्तरयत ।

२१० ४ ५ ५ ४ ५० ०

१८. यद्वाउ ऽ२३विश्पतिःशिताः । अद्यनोदेवसवितः इत्यनयोः सामगानयोः स्वरश्रुतिप्रदर्शनपूर्वकं पूरयत ।

१९ तद्वोगायसुतेसचाऽ६ ए । पुरुहूतायसत्वने । पुरुहूता । यासत्त्वाऽ२३नाऽ३४इ । शंयत् । गौवाओऽ२३४वा । नाऽ२३शाऽ३ । काऽ३४५नोऽ६हाइ ॥ सामगानेऽस्मिन् सर्वं स्वरश्रुतिसन्निवेशनं कृत्वा दीप्तायताश्रुति-अतिस्वार्यस्वरान् निर्धारत ।

२०. विवृत्तयः कति सन्ति ? तासां लक्षणमुदाहरणानि कानि ? प्रदर्शयत ।

२१. ह्रस्वन्दीर्घन्तथा वृद्धमभिगीतन्तु सामगाः ।
मुहुर्मृदङ्गवत्कुर्युः संपातोत्थानसंज्ञवत् ॥१॥
एकमात्रो भवेद् ह्रस्वो द्विमात्रो दीर्घ उच्यते ।
प्लुतस्त्रिमात्रो विज्ञेयो व्यञ्जनञ्चार्धमात्रकम् ॥२॥ इति श्लोकद्वयस्य सरलार्थं कुरुत ।

## <u>तृतीयः खण्डः</u>

**प्रश्नत्रयं समाधेयम् ।** **३X८=२४**

२२. त्रयाणामेव सस्वरं पूरयत ।

ईडिष्वाहि । आघाये अग्निम् । पान्तमा वः । ये ते पन्था ।

२३. गानमन्त्रद्वयं सस्वरं प्रपूरयत ।

५००५४५००४०५ ४ ५

(क) अग्नेयजिष्ठो अध्वराऽ६ए । (ख) प्रमंहिष्ठायगायत । (ग) गावः । एगावाः ।

२४. अधस्तनेषु कौचन द्वौ मन्त्रौ सस्वरं विलिखत ।

५० ४ २ ४० ५ ० ५० ५ ४ ५ ० ४ ५०

(क) मानाऽ३ आऽ३ इन्द्राभियादिशाः । (ख) त्वमिन्द्रबलादधीऽ६ए । (ग) यदिन्द्राहंयथौ ।

२५. जात्याभिनिहितस्वरितयोः सोदाहरणं लक्षणं निर्धारयत ।